**19E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : जानेवारी – २०२३**

**सत्र ५ वे**

**विषयः व्याकरण – ५** (19E451)

**दिनांक : ०३/०१/२०२३** **गुण : ८०** **वेळ : स.१०.०० ते १.००**

**सूचना : १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न अनिवार्य.**

**प्र.१. अ) अधोनिर्दिष्टेषु अष्टानां सन्धिं सन्धिविच्छेदं वा कुरुत** **(०८)**

१. प्रयच्छेश्वरे २. विद्वाँल्लिखति ३. कविः+अपि
४. पुना+रमते ५. ताश्वतस्त्रः ६. साधौ+अपि
७. देव्युपासना ८. गुरावुत्साहः ९. मुनी+इमौ
१०. उपासनया+एव ११. सयत्नोऽहम्

**ब) चत्वारि रूपाणि लिखत ।** **(०४)**

ईक्ष् – लिट्लकारस्य प्र.पु.ए.व.
ज्ञा – आत्मनेपद लट्लकारस्य प्र.पु.ब.व.
आत्मन् – सप्तमी–एकवचनम्
अदस् सर्वनाम्नः पु. प्रथमा एकवचनम्
कर्मन् – षष्ठीविभक्तेः एकवचनम्
कृ प्रयोजक धातोः लृट्लकारस्य प्र.पु.ए.व.

**क) चतुर्णां रूपाणां परिचयं कारयत ।** **(०४)**

अगात् ददौ जघान अभविष्यत्
द्रक्ष्यति नाम्नः जन्मनाम् भगवताम्

**ड) चतुर्णां समासानां विग्रहं कृत्वा तेषां नामानि लिखत** **(०४)**

कुपुरुषः गृहस्थः सुभाषितम् अनादिः लक्ष्मीभार्यः
उपकृष्णम् निर्मक्षिकम्

**इ) वाक्यद्वयस्य प्रयोगपरिवर्तनं कुरुत** **(०२)**

१. ये गुरून् सेवन्ते ते एव विद्यां लभन्ते ।
२. अस्माभिः अस्मिन् जगति सर्वत्र परिवर्तनमेव दृश्यते ।
३. जगतः कल्याणाय महापुरुषाः पृथिव्याम् अवतरन्ति ।
४. आत्मना पुरातनं शरीरं त्यक्त्वा नवीनं शरीरं गृह्यते ।

**च) अमरकोशानुसारं केषाञ्चन चतुर्णां शब्दानां समानार्थकान् शब्दान् योजयत ।** **(०४)**

अरण्यानि वीरः वल्ली छात्रः
अनीकम् पादपः गात्रम्

**छ) चत्वारि वाक्यानि सूचनानुसारं लिखत ।** **(०४)**

१. 'अलम्' इति अव्ययं योजयित्वा संस्कृतेन वाक्यं लिखत ।
२. छात्रः अर्थं जानाति । (णिजन्तधातोः(प्रयोजकधातोः)रूपम् उपयुज्य वाक्यं लिखत)
३. यदा वह्निना गृहं सम्प्राप्तं तदा कूपखननं न युक्तम् । (सति–सप्तमी–रचनायां वाक्यं लिखत)

४. दशरथस्य पुत्रः रामः। (अधोरेखितयोः शब्दयोः स्थाने तद्धितं योजयत)
५. पुरुषाः मन्त्रद्रष्टारः आसन्। (एकवचने लिखत)
६. श्रीकृष्णविरहेण राधायाः कृते जगत् तृणम्। (नामधातुं योजयित्वा वाक्यं लिखत)
७. ७५ इति संख्यां संस्कृतभाषया लिखत।

**प्र.२. अधस्तनेषु केषुचित् द्वौ परिच्छदौ स्वभाषया अनुवदत । (२०)**

**अ)** दादाजी कोण्डदेवः शिवराजस्य मन्त्री गुरुश्च। एषः अतीव न्यायनिष्ठः पुरुषः। स्वविषये अतीव कठोरः किन्तु अन्येषां विषये अतीव मृदुः। एकदा कोण्डदेवः राजोद्यानं प्रति गच्छति स्म । तत्र सर्वे वृक्षाः फलभरिताः आसन् । स्वराज्यविषये चिन्तयन् कोण्डदेवः अजानन्नेवैकं फलं स्वीकृतवान् खादितुम् उद्युक्तश्च। तत्क्षणे एव तस्य विवेको जागरितः। स चिन्तितवान् – 'किमहं कृतवान् ? राजोद्याने स्थितं फलमनुमतिं विनाहं गृहीतवान् भक्षितुं च उद्युक्तः। अनुचितं कृत्यं कृतं मया। दण्डार्हः खल्वहम्'। ततः स राजसभां गत्वा तत्र पृष्टवान् 'राजन् कश्चिदनुमतिं विना राजसम्पदः उपयोगं करोति चेत् तर्हि किं तस्य दण्डनम्?' इति।

**ब)** घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम् छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुखण्डम्।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णम् प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ।।
गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
सुस्वादुतोया प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः।।

**क)** अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः। तत्र निर्मितनीडक्रोडे पक्षिणः सुखेन निवसन्ति। अथैकदा वर्षासु जलधरपटलैरावृत्ते नभस्तले धारासारैर्महती वृष्टिर्बभूव। ततो वानरांश्च तरुतलेऽवस्थिताञ्छीताकुलान्कम्पमानान् अवलोक्य कृपया पक्षिभिरुक्तम् – भो भो वानराः। शृणुत –
अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः।
हस्तपादादिसंयुक्ता यूयं किमवसीदथ।।

**प्र.३. निम्नलिखितेषु केषुचिदेकं विषयमधिकृत्य संस्कृतभाषया निबन्धं लिखत। (१०)**

१. वृक्षाः हि जीवनाधाराः।
२. मकरसङ्क्रमणम्।
३. कविकुलगुरुः कालिदासः।

**प्र.४. अधस्तनेषु केषुचित् पञ्च सूत्राणां सोदाहरणं स्पष्टीकरणं कुरुत। (२०)**

१. कर्तुरीप्सिततमं कर्म।
२. सप्तम्यधिकरणे च ।
३. नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च।
४. प्रथमानिर्दिष्टं समास उपसर्जनम् ।
५. नाव्ययीभावादतोऽम्त्वपञ्चम्याः।
६. सह सुपा ।
७. समर्थः पदविधिः।
८. कर्तृकरणयोस्तृतीया।

----------